## U.G. 2nd Semester Examination - 2023

# SANSKRIT

**[HONOURS]**

**Course Code : SANS-H-CC-T-4**

Full Marks : 60 Time : $2\frac{1}{2}$ Hours

*The figures in the right-hand margin indicate marks. Candidates are required to give their answers in their own words as far as practicable.*

1. Answer any **ten** of the following questions in **Sanskrit language** in **Devanāgarī script:** 2×10=20

   i) अभिहिते कर्मणि का विभक्ति: भवति? उदाहरणं प्रदेयम्।

   ii) करण संज्ञा विधायकं सूत्रं किम्? करणकारके का विभक्ति:?

   iii) 'दैतेभ्यो हरिरलम्'—अत्र 'अलम्' इत्यस्य कोऽर्थ:? स्वस्तिशब्दयोगेन का विभक्ति: भवति?

   iv) 'अपाये' इति पदं कस्मिन् कारकसूत्रे प्राप्यते? 'अपाय:' शब्दस्य कोऽर्थ:?

   v) आधार: कतिविध:? औपश्लेषिकाधारस्य उदाहरणं देयम्।

   vi) 'सम्बोधने च' इति सूत्रे 'च'-कारस्य किं तात्पर्यम्? किं नाम सम्बोधनम्?

vii) 'तयोरेव कृत्य-क्त-खलर्थाः' इति सूत्रे 'तयोः' इति पदस्यार्थः वृत्यनुसारेण लिख्यताम्।

viii) कृत्-संज्ञाविधायकं सूत्रं किम्? कृत्-प्रत्ययः कस्मिन् वाच्ये प्रयुज्यते?

ix) 'तौ सत्' इति सूत्रे सत् संज्ञकौ कौ?

x) 'स्नातं मया' इत्यत्र किं वाच्यमस्ति? रेखाङ्कितपदस्य व्युत्पत्तिः दीयताम्।

xi) कृत्यसंज्ञकप्रत्ययः कतिविधः? तेषां नामानि लिख्यताम्।

xii) समानकर्तृकयोः धात्वर्थयोः पूर्वकाले विद्यमानाद् धातोः कः प्रत्ययः भवति? उदाहरणमेकं देयम्।

xiii) कर्मवाच्ये कर्तृकारके कर्मकारके च का विभक्तिः भवति?

xiv) 'लभ्यम्', 'स्तुत्यः' चेति पदयोः व्युत्पत्तिः प्रदेया।

xv) 'पीत्वा', 'भोग्यम्' चेति पदयोः व्युत्पत्तिः लेखनीया।

2. Answer any **four** of the following questions: 5×4=20

a) Translate into **Sanskrit** in **Devanāgarī script** any **five** of the following with the help of suffixes given within the bracket: 1×5=5

i) Daughter should be educated with care. (अनीयः)
কন্যাকে যত্নের সঙ্গে শিক্ষা দেওয়া উচিৎ।

ii) The girl was afraid of the snake. (क्त)
বালিকা সাপ দেখে ভয় পেয়েছিল।



iii) Baby lying in bed smiling. (ल्यप्)
শিশু বিছানায় শয়ন করে হাসছে।

iv) The teacher asks to think. (शतृ)
শিক্ষক চিন্তা করতে বলছেন।

v) Repeated sin destroys knowledge (शानच्)
বারবার করা পাপ প্রজ্ঞাকে নাশ করে।

vi) Always tell the truth. (ण्यत्)
সদা সত্য বলা উচিৎ।

vii) Time can take away everything in an instant. (तुमुन्)
কাল এক মুহূর্তে সব হরণ করতে পারে।

viii) Saying this he left. (त्वा)
এই বলে সে চলে গেল।

b) Translate into Bengali **OR** English **OR** Hindi any **one** of the following passages: 5

i) स्वदेशं प्रति ऐकान्तिकानुरागस्य विकाश एवं स्वादेशिकता। स्वदेशस्य भाषायाम् आहारे वा आचारे वा गीतौ वा नीतौ वा ऐकान्तिकी आसक्तिरेव स्वादेशिकताया निदर्शनम्। न हि वैदेशिकी भाषा वा नीतिर्वा, वैदेशिको धर्मो वा वेशो वा स्वदेशप्रेमिकस्य हृदय पदं करोति। स्वदेशस्य समुन्नतावेव मनांसि सम्यकतया गर्वोत्फुल्लानि भवन्ति देशप्रेमिकानाम्। स्वदेशप्रेमविगलितचित्ता एव मातृभूमेः सुकृतिनो वंशधराः।

ii) पुरा हिरण्यधनु: इति कश्चित् निषादराज: आसीत्। तस्य पुत्र: एकलव्य: अस्त्रशिक्षालाभार्थं द्रोणाचार्यस्य समीपमागत:। तं निषादपुत्र: इति ज्ञात्वा द्रोण: न गृहीतवान्। तदा एकलव्य: अरण्यमेकं प्रविश्य द्रोणाचार्यस्य मृन्मयीं मूर्तिं संस्थाप्य तं पूजितवान्। कालेन स: अर्जुनात् श्रेयान् धनुर्धरोऽभवत्।

c) Explain the following sūtra with Varadārāja commentary: 5

कर्तुरीप्सिततमं कर्म

**OR**

षष्ठी शेषे

d) Account for the case-ending of the underlined words (any **five**): 1×5=5

i) <u>वलिं</u> याचते वसुधाम्।

ii) <u>भगवन् !</u> त्रायस्व मां विपद:।

iii) धावतोऽ<u>श्वात्</u> पतति।

iv) <u>रामेण</u> वाणेन हतो वाली।

v) <u>विप्राय</u> गां ददाति।

vi) <u>सर्पिषो</u> जानीते।

e) Give the resulting forms of the following (any **five**): 1×5=5

चि+तव्य, भिद्+क्त, धा+क्तवतु, दृश्+तुमुन्, पच्+शानच्, प्र-विश्+ल्यप्, विद्+शतृ, यज्+क्त्वा



f) Re-write these sentence in passive voice (any **five**): 1×5=5

i) अहं रामायणं पठामि।

ii) सा नदीम् अगच्छत्।

iii) बालक: फलानि भुक्तवान्।

iv) चन्द्रं निरीक्ष्य शिशु: हसति।

v) दाता धनं दास्यति।

vi) ते गुरुं सेवन्ते।

3. Answer any **two** of the following questions selecting **at least one** from each Group. **One** must be written in **Sanskrit language** in **Devanāgarī script:** 10×2=20

## GROUP–A

यथाभिमतं विषय**मेकमा**श्रित्य प्रबन्ध: लेखनीय : 10×1=10

i) भारतीयजीवने साहित्ये च महाभारतस्य प्रभाव:

ii) भारतीयसंस्कृतौ रामायणस्य प्रभाव:

## GROUP–B

i) Explain the sūtra 'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा' with examples and after the commentary of वरदराज:। 10

**OR**

ii) Explain the sūtra 'कृत्यल्युटो बहुलम्' with examples and after the commentary of वरदाराज:। 10